भवतीत्यनेनैव सर्व्वेषामुदकदाने प्राप्ते दशासप्ताहशमादित्युक्तं तत् सन्निकर्षतारतम्येनाशौचभेदेऽप्युदककर्म्मसनानार्थमिति। अशौचभेदस्तु सप्तमपुरुषपर्य्यन्तं सपिण्डत्वाद्दशाहः। ततश्च दशमपुरुषपर्य्यन्तं त्र्यहः। तथा च विष्णुवृहस्पती।

"दशाहेन सपिण्डास्तु शुध्यन्ति मृतसूतके।
त्रिरात्रेण सकुल्यास्तु स्नात्वा शुध्यन्ति
गोत्रजाः॥"

ततश्चतुर्द्दशपुरुषपर्य्यन्तं पक्षिणी। ततश्च जन्मनामस्मृतिपर्य्यन्तमेकाहः। तथा च मिताक्षराविवादचिन्तामण्योर्वृहन्मनुः।

"सपिण्डता तु पुरुषे सप्तमे विनिवर्त्तते।
समानोदकभावस्तु निवर्त्तेताचतुर्द्दशात्॥
जन्मनामस्मृतेरेके तत्परं गोत्रमुच्यते॥"

अत्र समानोदकत्वे द्विविधे। पूर्व्वत्र गोतमः पक्षिणीमसपिण्डे इति। परत्र हारीतः।

"मातामहे त्रिरात्रं स्यादेकाहस्त्वसपिण्डके॥"

अतैव गोत्रजानामहः स्मृतमिति जावालवचनम्। ततः परं सर्व्वथा समानोदकतानिवृत्तेः स्नानमात्रमिति। स्नात्वा शुध्यन्ति गोत्रजा इति वृहस्पत्युक्तत्वादिति। इति शुद्धितत्त्वम्॥

सपिण्डीकरणं, क्ली, (सपिण्ड + कृ + ल्युट्। अभूततद्भावे च्विः।) पूर्णसंवत्सरक्रियमाणपार्व्वणैकोद्दिष्टेतिकर्त्तव्यताकश्राद्धम्। यत्र प्रेतपिण्डस्य पितृपिण्डेन सह मिश्रीकरणम्। यथा,—

"सपिण्डीकरणं प्रोक्तं पूर्णे संवत्सरे पुनः।
कुर्य्याच्चत्वारि पात्राणि प्रेतादीनां द्विजोत्तमाः॥
प्रेतार्थं पितृपात्रेषु पात्रमासेचयेत्ततः।
ये समाना इति द्वाभ्यां पिण्डानप्येवमेव हि॥
सपिण्डीकरणश्राद्धं देवपूर्व्वं विधीयते।
पितॄनावाहयेदत्र पृथक् पिण्डञ्च निर्द्दिशेत्॥
ये सपिण्डीकृताः प्रेता न तेषां स्यात् पृथक्
क्रिया।
यस्तु कुर्य्यात् पृथक् पिण्डं पितृहा सोऽपि
जायते॥"

इति कूर्म्मपुराणे उपविभागे २२ अध्यायः॥*॥

अन्यच्च।

"ततः संवत्सरे पूर्णे सपिण्डीकरणं भवेत्।
सपिण्डीकरणादूर्द्ध्वं प्रेतः पार्व्वणभुग्यतः॥
वृद्धिपूर्त्तेषु योग्यश्च गृहस्थस्य भवेत्ततः।
सपिण्डीकरणं श्राद्धं देवपूर्व्वं निजोजयेत्॥
पितॄनेवाशयेत्तत्र पृथक् प्रेतं विनिर्द्दिशेत्।
गन्धोदकतिलैर्युक्तं कुर्य्यात् पात्रचतुष्टयम्।
अर्घ्यार्थं पितृपात्रेषु प्रेतपात्रं प्रसेचयेत्॥
तद्वत् सङ्कल्प्य चतुरः पिण्डान् पिण्डप्रदस्तदा
ये समाना इति द्वाभ्यामाद्यन्तु विभजेत्त्रिधा॥
चतुर्थस्य पुनः कार्य्यं न कदाचित् यतो भवेत्
ततः पितृत्वमापन्नः स चतुर्थस्तदा पुमान्॥
अग्निष्वात्तादिमध्यन्तु प्राप्नोत्यमृतमुत्तमम्।
सपिण्डीकरणादूर्द्ध्वं तस्मै तस्मान्न दीयते॥"

इति मात्स्ये १८ अध्यायः॥

अपरञ्च। अथ सपिण्डीकरणम्। तत्र गोभिलः। पूर्णे संवत्सरे षण्मासे त्रिपक्षे यदहर्व्वा वृद्धिरापद्येत तदहस्त्वाच्युदकपात्राणि सतिलगन्धपुष्पोदकानि पूरयित्वा त्रीणि पितॄणामेकं प्रेतस्य प्रेतपात्रं पितृपात्रेष्वासिञ्चति। ये समानाः समनसः पितरो यमराज्ये तेषां लोकः स्वधा नमो यज्ञो देवेषु कल्पताम्।

"ये समानाः समनसो जीवा जीवेषु मामकाः।
तेषां श्रीर्मयि कल्पतामस्मिन् लोके शतं समाः॥"
इति॥

एतेनैव पिण्डो व्याख्यात इति। पूर्णे संवत्सरे इति मुख्यकल्पः। तदशक्तौ नवमो मासः। संवत्सरान्ते विसर्ज्जनं नवममासस्यमित्येके। इति पैठीनसिवचनात्। तदशक्तौ षष्ठो मासः। तत्राप्यशक्तौ त्रिपक्षः तत्राप्यशक्तौ अशौचापगमे प्रथममासस्य द्वादशभिर्दिनैर्द्वादशमासिकानि श्राद्धानि निर्व्वर्त्त्य त्रयोदशाहः सपिण्डीकरणकालः। शूद्रस्य द्वादशाहो न तु त्रयोदशाह एव मासिकार्थवत् द्वादशाहश्राद्धं कृत्वा त्रयोदशेऽह्नि वा तत् कुर्य्यान्मन्त्रवर्ज्जं हि शूद्राणां द्वादशेऽह्नीति विष्णुवचनात्। मासिकार्थवदिति मासिकार्थो मासि मासि क्रियमाणश्राद्धप्रयोजनं प्रेताप्यायनादितद्युक्तं द्वादशाहक्रियमाणश्राद्धमित्यर्थः॥*॥ यत्र त्वेकादशमासाभ्यन्तरेऽधिमासपातः तत्र त्रयोदशसु दिनेषु त्रयोदश मासिकानि कृत्वा चतुर्द्दशेऽह्नि सपिण्डनं कार्य्यमिति। संवत्सराभ्यन्तरे यद्यधिमासो भवति तदा मासिकार्थं दिनमेकं वर्द्धयेत्। इति विष्णुवाक्यात्। शूद्रस्य त्रयोदशदिनेषु त्रयोदशमासिकानि त्रयोदशेऽह्नि सपिण्डनं दृष्टपरिकल्पनान्यायात्। एवञ्च श्राद्धवृद्धिमात्रं न दिनवृद्धिरिति मिश्रोक्तं हेयम्। तद्वृतविष्णुसूत्रे दिनमेकं वर्द्धयेदिति श्रुतेः। श्राद्धाधिक्यमाह सत्यव्रतः।

"संवत्सरस्य मध्ये तु यदि स्यादधिमासकः।
तदा त्रयोदशे श्राद्धं कार्य्यन्तदधिकं भवेत्॥"

तत्राप्यशक्तौ प्रथममासस्यैकाह एव द्वादशमासिकसहितसपिण्डीकरणकालः।

"मुख्यं श्राद्धं मासि मासि अपर्य्याप्तावृतुं प्रति।
द्वादशाहेन वा कुर्य्यादेकाहे द्वादशाथवा॥"

इति मरीचिवचनात्। अपर्य्याप्तौ अशक्तौ ऋतुर्म्मासद्वयम्। अत्र कल्पे षष्ठमासिकदिने पञ्चममासिकं कृत्वा प्रथमषाण्मासिकं कृत्वा षष्ठमासिकं कार्य्यं तदाद्युत्कर्षन्यायात्। न तु तत्पूर्व्वं षाण्मासिकं व्युत्क्रमापत्तेर्न च पञ्चममासिकमपि पूर्व्वदिने कृततिथ्यभावात् एवमेव वाचस्पतिमिश्रः॥*॥ अपकर्षनिमित्तमाह व्याघ्रः।

"आनन्त्यात् कुलधर्म्माणां पुंसाञ्चैवायुषः
क्षयात्।
अस्थितेश्च शरीरस्य द्वादशाहः प्रशस्यते॥"

एतच्च द्वादशाहपदं शावाशौचान्ततृतीयदिनमात्रपरमिति प्राचीनमैथिलाः अजहत्स्वार्थलक्षणया स्वजात्युक्ताशौचान्ततृतीयदिनमात्रोपलक्षकं इति श्राद्धप्रदीपश्राद्धचिन्तामणी। तद्द्वयमप्ययुक्तम्। द्वादशाहेन वा कुर्य्यात् इति मरीचिवचनद्वादशाहश्राद्धं कृत्वा त्रयोदशेऽह्नि वा कुर्य्यात् इति विष्णुवचनाभ्यामेकवाक्यतया द्वादशाहमित्यस्य द्वादशदिनपरत्वात्। कुलधर्म्माणामिति कुलधर्म्मज्योतिरागमादिसिद्धमन्तरभाविनाशपरचक्रभयोत्पन्नस्वेच्छदेशगमनादिभिर्निमित्तैः अशौचापगमे द्वादशदिनानि षोड़शश्राद्धापकर्षकाल इति शूलपाण्युपाध्यायव्याख्यानात्। मरीचिनैव एकाहे द्वादशाथवेति सामान्यत एव एकाहविधानाच्च। अतएव एकाहापेक्षया प्राशस्त्याभिधानमपि सङ्गच्छते अतएव प्रथममासस्य एकाह एव द्वादशमासिकसहितसपिण्डीकरणकालः इति श्राद्धविवेकः। अत्र यानि एकाहकर्त्तव्यतया द्वादशमासिकश्राद्धान्युक्तानि तानि शूद्रेणापि आद्यमासिकदिन एव कार्य्याणि। न त्वाद्यमासिकं कृत्वा तत्परदिने एकादशमासिकानीति श्रेयम्। एवञ्च तेषामपकर्षे तन्मध्यतदन्तकालकर्त्तव्यतया षाण्मासिकद्वयसपिण्डीकरणापकर्षः सिध्यतीति सुधीभिर्विभाव्यम्॥*॥ यदहर्व्वा वृद्धिरिति वृद्धिराशास्यमानं पुंसवनादि। आपद्येत आसन्ना भवति तद्दिने सपिण्डीकरणम्। तथा हि प्रागावर्त्तनादह्नः कालं विद्यात्। इति गोभिलसूत्रेण पुंसवनादिरूपवृद्धेर्यामद्वयाभ्यन्तरे विधानात् सपिण्डीकरणस्य चापराह्णे विधानात्तयोः कालयोरबाधाय वृद्धिपूर्व्वदिने अपकर्षः॥*॥ ननु सपिण्डीकरणस्यापराह्णिकत्वे किं प्रमाणमिति चेत् अपराह्णे तु पैतृकमित्युत्सर्गवचनम्।

किञ्च "यद्यप्यदन्तकः पूषा पैष्टमत्ति सदा
चरुम्।
अग्नीन्द्रेश्वरसामान्यात्तण्डुलोऽत्र विधीयते।"

इति छन्दोगपरिशिष्टवचने यथा बहूनामनुरोधात्तण्डुलचरुर्नैकानुरोधात् पैष्टचरुः। विरुद्धधर्म्मसमवाये भूयसां स्यात् सधर्म्मकत्वम्। इति जैमिनिसूत्रात्। तद्वदत्रापि बहुदेवताकपार्व्वणानुरोधादेकोद्दिष्टकालबाध इति। एवञ्च संवत्सरं अधिकृत्य।

"सपिण्डीकरणं तस्मिन् काले राजेन्द्र तत् शृणु
एकोद्दिष्टविधानेन कार्य्यं तदपि पार्थिव॥"

इति विष्णुपुराणीयमेकोद्दिष्टांशे तदितिकर्त्तव्यतापरं न तु तत्कालपरम्। तथा च परिशिष्टप्रकाशधृतम्।

"श्राद्धद्वयमुपक्रम्य कुर्व्वीत सहपिण्डताम्।
तयोः पार्व्वणवत् पूर्व्वमेकोद्दिष्टमथापरम्॥"
इति॥*॥

एवञ्च शुद्धितत्त्वलिखित-स्यमन्तकोपाख्यानवत् वृद्धिं निश्चित्य कृतं सपिण्डीकरणं तदानीं विघ्नेन वृद्ध्यभावेऽपि वृद्ध्यारम्भकालान्तरं पूर्व-